शुक्रंदतल्या॥१६॥यःपठेत्मातरुत्थाय
पवेत्स्लवस्तोत्रमुत्तमम्॥ सर्वपापवि
निर्मुक्तोविमलोकंसगच्छति॥१७॥३
दंपवित्रमायुष्यंपांडवैःपरिकीर्तित
म्॥ यःपठेत्मातरुत्थायविस्लोकं
सगच्छति१८॥इतिश्रीपांडवगीतास
माप्तम्॥॥

फो॰ ८

गेसंप्रदेशात्सुरवेन्द्रः खलत्वात्संघ।
तिष्ठितमिदं श्रुत्वा प्रभो। सौम्येमेघ
भवता समागमः स्वामिना विरहेण व
द्धः स्थिता॥ ॥ श्रेनरण्यतिनगामणीय।
मीयानदश्रपनकालिकास्त्वमे। नाम
पीतिपर्ति सर्वतः स्वरूपमलप्रकाश शून्य
या॥२॥ नावकेवपुषिविक्रमनिर्भरेवित्स
धारसमयेनिरन्तरेवोतिष्ठतः सततम
र्वतः प्रभंजीवितं स्तनमथास्य न्नमे ३
स्वरोहमहमेवरूपवान्संदृशैत्। स्मर
भगोस्मिकोपरं। मन्मनोस्तिजगती
तिशोभतेमानिता वदनुरागिणः पर
म। धा। देवदेवभवदृष्यासूना ख्यातिसंद
श्ना। लब्धजन्मना। नयथास्थितपदा
र्थसंविदामाक्रमश्च वरणार्चनोवितं ४
ध्यायतेतदनुदर्शयतेततः स्पृशतेवपु
रेमिस्वरः स्वयम्। यत्र शून्यमहोत्सवः
समेसर्वदास्तुभवतोनुभावतः॥ [illegible]

यथास्थितपदार्थदर्शनंयुष्मदर्चन।
महोत्सवश्चमे।।युगमेतदितरेतरा
श्रयंभक्तिशालिषुसदाविजृम्भते।।७
ततइंद्रियमुखेनसंततंयुष्मदर्चनर
सायनासवम्।सर्वभावचषकेषुपूरि
तेष्वापिबन्नपिभवेयमुन्मदः।।८।।अन्य
वेद्यमणुमात्रमस्तिनस्वप्रकाशम।
खिलंविजृम्भते।।यत्रनाथभवतःपुरे
स्थितेतत्रमेजरसदोत्सवोविभुः।।९।।
दासदास्तिविनियोजितोप्यहंस्वैःस्व
यैवपरमेश्वरत्वया।।दर्शनेनकिम।
स्मिपात्रितःपादसंवहनकर्मणापि·
वा।।१०।।शक्तिपातसमयेविचारणंप्रा
प्तमीशनकरोषिकर्हिचित्।।अद्यमां
प्रतिकिमागतंयतःस्वप्रकाशनवि
नविधौविलम्बसे।।११।।तत्रतत्रविष
उंस्तो येबहिर्विभासतीशापरमीश्वरीयुते
८ त्वांजगत्रितयनिर्भरंसदालोकयेय।

निजपाणिहृज्जितम् ॥२॥ त्वामिमोऽथ
मभिसंधिमात्रतो निर्विवधमपि ह ।
त्वत्सर्वदास्यप्रसादपरमामृतास·
वादनेकेन परिलब्धनिर्वृति ॥३॥ य
स्य समस्तमस्यगार्थवल्लभस्पर्शमात्रवि
धिना च मत्कृतिम् ॥ तां समर्पयति तेन
तेवशः कृतयत्नबलभक्तिशालिनः ॥४॥ ध
न्यास्य यस्य विलमात्मना स्फुरे विश्व
मामृणामिरूपमाहृणान् ॥ यत्स्वयं लि
ङ्गमेन नग्नासेनन्स्ममलमतिभाव!
मङ्गलम् ॥५॥ यो विकल्पमिदमर्थम
ङ्गलं पवणतीशानि विलेभवद्धु ॥६॥ त्वा
मपत परिहृविनेजगात्यनिमत्त ।
श्विनः कुतोभयम् ॥७॥ कण्टकेन विति
हमीशानेकालकूटमपि मे महामृत
मपानमहृतेभवयुगभेदहृन्निय·
दिश्वनेन मे ॥८॥ त्वत्प्रलापमयरक
मीतिकानि पुत्रकवदनोपशोभितः

स्यामयापि भवदर्चनक्रियाप्रेयसीप्रवि
मताश्रयः सदा॥७॥ ईहितं न वचनं परमे
श्वरं शकृते गणोपि तेन याचमे॥ दत्तम
प्यमृतं निभैरवत्वुः स्वं न पातमनुमन्यते
नघ्या॥९॥ त्वामगाय्यमविकल्पमद्वय
स्वस्वरूपमखिलार्थघस्मरम्॥ स्नाविश
न्नहंस्तुमेसदासर्वदा पूजयेयमभिसंस्तुवी
य च॥१०॥ इति संग्रहस्तोत्रं समाप्तम्॥

ॐ नमः शिवाय। ॐ नत्वा श्रीभारतीतीर्थविद्यारण्यमु
नीश्वरौ। प्रत्यक्तत्त्वविवेकस्य क्रियते पददीपिका॥१॥
प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमा
नाभ्यां शिष्टाचारपरिप्राप्तमिष्टदेवतागुरुनमस्कारल
क्षणं मंगलाचरणं स्वेनानुष्ठितं शिष्यशिक्षार्थं श्लो
केनोपनिबध्नाति। अर्थाद्विषयप्रयोजने च सूचयति
नम इति। शं सुखं करोतीति शंकरः सकलजगदान
न्दकरः परमात्मा। एष ह्येवानन्दयातीति श्रुतेः। आ
नन्दो निरतिशयप्रेमास्पदत्वेन परमानन्दरूपः। प्रत्य
गात्मा शंकरश्चासावानन्दश्चेति शंकरानन्दः प्रत्यग
भिन्नः परमात्मा स एव गुरुः परिपक्वमलो[illegible]। कषायः

ॐ नमः श्रीशंकरानन्दगुरुपादाम्बुजन्मने
सविलासमहामोहग्राहग्रासैककर्मणे॥१॥

त्वादनेन हेतुशक्तिपातेन योजयति परतत्त्वे स दीक्षा।
चार्यमूर्तिस्थ इत्यागमात्। श्रीमांश्चासौ शंकरान
न्दगुरुश्चेति। गंधहिवत्समासः। अनेन गुरोरणिमा
द्यैश्वर्यसंपन्नत्वं सूचितं। यद्वा श्रिया भूत्या शंकरोती
ति शंकरः। पतेर्धातोः परायणमिति श्रुतेः। अनेन
श्रीगुरोर्भक्तेष्टसंपादने सामर्थ्यं सूचितं भवति। त
स्य गुरोः पादाम्बुजन्मचरणकमलं तस्मै नमः प्रह्वी
भावोऽस्तु। किंविशिष्टाय सविलासमहामोहग्रासैकक
र्मणे। विलासः कार्यवर्गः तेन सह वर्तत इति सवि

लास॥ महामोहो मूलाज्ञानं स एव ग्राहो मकरादि
जन्तुवशात्मस्यातीवदुःखहेतुत्वात्स एव तस्य ग्रासो
निवर्तनं। स एवैको मुख्यं कर्म व्यापारो यस्य तत्तथा
तस्मादित्यर्थः। यद्वा शंकरानंदपदहृदयसामानाधि
करण्येन जीवब्रह्मणोरेकत्वलक्षणो विषयः॥ सू
चितश्च जीवस्य भूमब्रह्मरूपतया परिच्छिन्नसुखाविः
र्भावलक्षणं प्रयोजनं च सूचितं। सर्वविलासेत्यादि
नानिःशेषानर्थनिवृत्तिलक्षणं प्रयोजनं सूचितम
वाभिहितम्॥ इदानीमवांतरप्रयोजनकथन
पूर्वकं ग्रंथारंभं प्रतिजानीते॥ तत्पादांबुरुहेति

तत्पादांबुरुहद्वंद्वसेवानिर्मलचेतसां
सुखबोधाय तत्त्वस्य विवेकोयं विधीयते १

तस्य गुरोः पादावेवांबुरुहे कमले तयोर्द्वंद्वं तस्य
सेवया पर्युपासनया नमस्कारादिलक्षणया नि
र्मलं रागादिरहितं चेतोंतःकरणं येषां ते तथोक्ता
स्तेषां सुखबोधायानायासेन तत्त्वज्ञानोत्पादनाय
यं वक्ष्यमाणप्रकारस्य तत्त्वस्यारोपितस्वरूप
स्याखंडसच्चिदानंदं महावाक्येन लक्ष्यत इति
वक्ष्यमाणस्य विवेक आरोपितात्पंचकोशादिल
क्षणाज्जगतो विवेचनं विधीयते क्रियत इत्यर्थः
पं॰श्रु
१ २ ॥॥ राम ॥ राम ॥ राम ॥ रामजी

जीवब्रह्मणोरेकत्वलक्षणविषयसंभावनाय जी-
वस्य सत्यज्ञानादिरूपतां दर्शयिष्यन्नादौ ज्ञानस्या-
भेदप्रतिपादनेन नित्यत्वं साधयति ॥ शब्दस्पर्शाद-
य इत्यादिना ॥ तत्र तावद्विस्पष्टव्यवहारवति जागरे
ज्ञानाभेदं साधयति ॥ शब्दस्पर्शादय इति जागरे इंद्रि-
यैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणावस्थावि-
शेषे वेद्याः संविद्विषयभूताः शब्दस्पर्शादय आका- (स्तदाधारत्वेनप्रसिद्धा)
शादिगुणत्वेन प्रसिद्धा आकाशादयश्च ॥ वैचित्र्यात्प-
रस्परं गवाश्वादिवद्वैलक्षण्योपेतत्वात्पृथक्पर-

शब्दस्पर्शादयो वेद्या वैचित्र्याज्जागरे पृथक् ।
ततो विभक्ता तत्संविदैकरूप्यान्न भिद्यते ॥ ३ ॥

स्परं भिद्यंते ॥ ततस्तेभ्यो विविक्ताद्व्याविवेचिता त-
त्संवित्तेषां शब्दादीनां संवित्तानैकरूप्यात्संवित्सं-
विदित्येकाकारेणावभासमानत्वाद्गगनमिव न भि-
द्यते ॥ अत्रायं प्रयोगः ॥ विवादाध्यासिता संवित्स्वाभा-
विकभेदशून्या औपाधिकपरामर्शमंतरेणाविभाव्य-
मानभेदत्वाद्गगनवत् ॥ शब्दसंवित्स्पर्शसंविदो न
भिद्यते संवित्त्वात्स्पर्शसंविद्वदिति ॥ एकस्यापि सं-
विदो गगनस्येवौपाधिकभेदेनापि भिन्नव्यवहा-
रोपपत्तेर्वास्तवभेदकल्पनायां गौरवं बाधकं च
ज्ञेयम् ३ ॥ ॥ ॥

उक्तमार्थं स्वप्ने प्रत्यभिज्ञानादि । तथा स्वप्न इति । यथा
जागरयोर्वैविध्यादिविषयाणां भेदेऽप्येकरूप्यात्संविदो
भेदस्तथात्र नैव इत्यकारेण स्वप्नैकयोरूपसंहा-
रेण स्वप्नजागरादिसंस्कारजन्मप्रत्ययं स्वविषयः
स्वप्नस्य सकललक्षणायां स्वप्नावस्थायामपि विषया-
णां भिन्नानां संविदिति । ननु यदि स्वप्नजागरयोरे-
काकारता विषयतत्संविदोर्भेदाभेदाभ्यां तर्हि स्वप्नो
जागर इति भेदव्यवहारः किंनिमित्तक इत्याशंक्या,,

तथा स्वप्नेऽत्र वेद्यं
तु नास्थिरं जागरे स्थि-
रम् । न तद्भेदोऽस्त्यनयोः
संविदेकरूपतो भि-
द्यते ॥४॥ राम

हा॥ अत्र वेद्यं त्विति । अत्र स्वप्ने वेद्यं परिदृश्यमानं व-
स्तुजातं नास्थिरं तथापि प्रतीतिमात्रशरीरत्वात् ॥
जागरे तु परिदृश्यमानं वस्तुजातं स्थिरं स्थायि का-
लांतरेऽपि दृष्टं योग्यत्वात्तत्र भेदः स्थिरास्थिरविषयत्व-
लक्षण एवेति लक्षणात्तद्भेदस्तयोः । स्वप्नजागरयोर्भे-
दस्त्वर्थः ॥ ननु स्वप्नजागरयोर्भेदश्चेत्तत्संविदोऽपि
पं॰ ३ भेदः स्यादित्याशंक्याह तयोरिति । एकरूपेति
२ हेतुगर्भितं विशेषणम् । ४ ॥

एवमवस्थाद्वयेज्ञानस्यैकत्वंप्रसाध्यस्मृतिकालीन·
स्यापितस्यतेनैकात्म्यसाधनायानन्तरंतावत्। ज्ञानंसाधय·
ति। स्मृतोत्थितस्येति। स्मृत उत्थितः स्मृतोत्थितः स्मृतं स्मृ
तिक्षणस्मादुत्थितइतिवातस्य सोऽप्रमत्तमोबोधः। स्मृ
तिकालीनस्यतत्सोऽज्ञानस्यबोधोबोधोऽज्ञानमस्तिनकिंचि
दवेदिषमिति। सा स्मृतिरेवभवेमानुभवस्तत्कारणासं·
द्रियसन्निकर्षव्याप्तिलिंगादेरभावादितिभावः। ननु
कितत्राह। साचेतिसाचस्मृतिरेवंतद्विषयावगाहीनु
भूतोऽनः विषयोयस्याः सातथोक्तायास्मृतिः सानुभव
पूर्विकेतिव्याप्तिलोकेप्रसिद्धेतिभावः। ततोपिकिंत
त्राह। प्रबुद्धमिति। ततस्तस्मात्कारणात्सोऽप्रमत्त·
स्मृत्युत्थितस्यसोऽप्रमत्तमोबोधोभवेत्स्मृतिर्यस्मादाव
बुद्धविषयावगाहिन्यनदानभूध। प। तद्बोधोविषयादिज्ञो
नबोधोत्तमबोधवत्। एवंस्थानत्रयेप्येकासंवित ह
दिनांतरे। ध। सत्तदासप्रमावबुद्धमनुभूतमस्मिरयं
नव्यं॥ अत्रायंप्रयोगः। विमितंनाकिंचिदवेदिषमिति
ज्ञानमनुभवपूर्वकंभवितमर्हतिस्मृतित्वात्सामेमा।
तेतिस्मृतिवदिति॥ तस्मानुभवस्याविषयात्ज्ञानादे
देवोधानरादभेदंवाहद्वाभ्यां। सबोधइति। सबोधः
सोऽप्रमात्तानानुभवः विषयात्ज्ञानाद्भिन्नस्यमवि
तमर्हतिबोधत्वात् घटबोधवत्। बोधान्तरान्नभिद्य
तेबोधत्वात्स्वमबोधवत्। फलितंकथयन्नुक्तन्यायम
न्यत्राप्यतिदिशति। एवमित्यादिना। स्थानत्रयेपिएक
दिनवर्तिजाग्रत्स्वप्नसुषुप्त्यवस्थात्रयेपिसंविदेकैवसर्वकालं
मावथावणमितिन्यायात्। तद्दिनांतरइति। ॥८॥॥

यथैकस्मिन्दिवसेः वस्त्वान्तरेपि तत्तानस्याभेद एवम
न्यस्मिन्नपि दिवसेः नेकधाः नेकप्रकारेण । गतानागते
षु । अतीतानागामिषु मासेषु चैत्रादिषु संवत्सरेषु भवादिषु प
युगेषु कृतादिषु कल्पेषु ब्राह्मादिषु तानस्याभेद एवा
र्थः । संविदेकत्वसमर्थने फलमाह । नोदेतीति
यतः संविदेकाः नोदेति नास्तमेति । न वि
नश्यति च । अस्मात्तिकयोरुत्पत्तिविनाशयोरसिद्धेः ॥
उत्पत्तिविनाशयोस्तयैव संविदा ग्रहीतुमशक्यत्वात्सं

मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा
नोदेति नास्तमेत्येका संविदेषा स्वयंप्रभा ॥

विदन्तराभावाच्चेति भावः । ननु संविदन्तराभावे ग्राह-
काभावात्स्वस्याप्यभावे जगदान्ध्यप्रसङ्ग इत्यत आह
एषेति । स्वयंप्रभेति । संवित्स्वप्रकाशाभिन्नमहः
स्ति । अवेद्यत्वे सत्यः परोक्षत्वाद्व्यतिरेके घटवत् । अन्यथा
यं विशेषणासिद्धो हेतुः संविदः । स्ववेद्यत्वे कर्मक
र्तृत्वविरोधात् । परवेद्यत्वेऽनवस्थानात् । अतः स्व
प्रकाशत्वेन भासमानायाः संविदः । सर्वावभास
पं. ३ कत्वसंभवान्न जगदान्ध्यप्रसङ्ग इति भावः ॥ २ ॥ ॥
३ रामकृष्णाय नमो नमः ॥ नारायणाय नमो नमः

ित भवत्वेवं संविदो नित्यत्वं स्वप्रकाशत्वं च ततः कि-
मित्यत आह इयमिति । अत्रायं प्रयोगः इयं संविदात्मा
भवितुमर्हति नित्यत्वे सति स्वप्रकाशत्वात् । यन्नैवं तन्नै- मिति
वं यथा घटः इति । आत्मनो नित्यत्वं संविद्रूपत्वप्रसाधनेन
सत्यत्वमपि प्रसाधितं भवति नित्यत्वाद्धि सत्यत्वाभावा-
त् नित्यत्वे सत्यत्वं न यस्यास्ति न त्रिस्व...स्विति बाधस्य
ति मिथ्यैरुक्तत्वादिति भावः । आत्मन आनंदरूपत्वं साध-
यति । परानंद इति । आत्मास्यानुभूयते । परश्चासावानंद-
श्च परानंदः निरतिशयसुखस्वरूप इत्यर्थः । तत्र हेतु-
माह परप्रेमास्पदमिति । यतो यस्मात्कारणादयमात्मा
निरुपाधिकत्वेन निरतिशयस्य प्रेम्णः स्नेहस्यास्पदं

इयमात्मा परानंदः परप्रेमास्पदं यतः ।
मा न भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते ॥ ८

विषयस्तस्मात् ॥ अत्रेदमनुमानं आत्मा परानंदरूपः
परप्रेमास्पदत्वात् यः परानंदरूपो न भवति नासौ पर-
प्रेमास्पदमपि यथा घटः । न चायं परप्रेमास्पदं न भ-
वति न तस्मात्परमानंदरूपो न भवतीति । ननु आत्मनि-
यिद्यामिति हेतुस्य उपलभ्यमानत्वात्प्रेमास्पदत्वमेवासि-
द्धं कुतः परप्रेमास्पदत्वमित्याशंक्यानस्य तु स्वसंबंध-
निमित्तकत्वेनान्यथासिद्धत्वात् । प्रेमात्मनि अनु-
भवत्वान्नैवमिति परिहरति । मा न भूवमिति । हि यस्मा-
त्कारणात् आत्मनि विषये मा न भूवं अहं मा भूवमिति न
ममास्त्वं कदापि मा भूत् । किंतु भूयासमेव सदा सत्व-
मेव भूयादित्येवंविधं प्रेम सर्वैरनुभूयते । अतो ना-
सिद्धिरित्यर्थः ॥ ८ ॥

नात्मनि

मा भूत्स्वरूपासिद्धिः प्रेम्णः परत्वेन प्रमाणाभावाद्विशेषा
णासिद्धिर्हेतोरित्याशंक्याह तस्मैमेति। यदन्यत्र स्वातिरि
क्ते पुत्रकलत्रादौ प्रेम तदात्मार्थं तेषामात्मशेषत्वनिमित्तक
मेव न स्वाभाविकमेवमात्मनि विधीयमानं प्रेम स्वार्थ्ये
मात्मनोऽन्यशेषत्वनिमित्तकं न भवति किं त्वात्मनिमित्तक
मेव अतो निरुपाधिकत्वात्परमं निरतिशयं। फलित
माह तेन निरतिशयप्रेमास्पदत्वेनात्मनः परमानन्दता
निरतिशयसुखस्वरूपत्वं सिद्धं ॥१८॥ एतैः सप्तभिः श्लो
कैः प्रतिपादितमर्थं संक्षिप्य दर्शयति इत्थमिति ॥ इत्थं

तस्मै मात्मार्थमन्यत्र नैव मुख्यार्थमात्मनि
प्रतस्तत्परमं तेन परमानन्दतात्मनः ॥१९
इत्थं सच्चित्परानन्द आत्मा प्रत्यक्तथाविधं
परं ब्रह्म तयोरैक्यं श्रुत्यन्तेषूपदिश्यते ॥ २०

इत्थं सत्यादिवाक्यादिना तावत्सम्यक्त्वं प्रसाध्य तस्यैव प
मात्मत्वमात्मत्वप्रसाधनेनात्मनः सच्चिद्रूपत्वं साधितं। प
रानन्दत्वादिना च परमानन्दरूपत्वं समर्थितं। अतस्त
त्त्वमसिमहावाक्ये त्वंपदार्थः सच्चिदानन्दरूपः सिद्धः॥ ननु
कलत्वात्स्वात्मनो प्रत्यक्षादावगतत्वादुपनिषदो निर्विषय
त्वेनाप्रामाण्यप्रसङ्ग इत्याशंक्याह। तथाविधमिति। तथा
तादृशी विधा प्रकारो यस्य तत्तथाविधं सच्चिदानन्दरूपं पर
ब्रह्म तत्पदार्थस्तयोस्त्वंपदार्थयोरैक्यमखण्डैकरसत्वं
प्रे.प्र. च श्रुत्यन्तेषु वेदान्तेषूपदिश्यते प्रतिपाद्यत इति अतो न
४ वेदान्तानां निर्विषयत्वमित्यर्थः ॥२०॥ १०॥ १०॥ १०

आत्मनः परमानंदरूपत्वमाक्षिपति। अभाने इति। पर।
मानंदरूपत्वेन भासने वा अभाने प्रतीतो न परप्रेमात्मनि·
निरतिशयः स्नेहो न स्यात्। विषयेष्टसंयोगेन जन्यत्वात्
स्नेहस्य भाने प्रतीतौ न विषये स्नेहवत्साधने स्रगादौ न तु।
स्नेहस्येवास्य हेतुत्वान्न स्यात्। फलरूपे सुखे संसाधने च
उपपत्तेर्निरतिशयानंदलाभस्य निरतिशयान्के साधन
पारतंत्र्यादिदोषदूषिते वैषयिके स्नेहस्य हानोपगावत।
स्यामानंदरूपता। आत्मन उपपन्नेति। शंकायांतस्याश्च
संभवात्मैवमिति परिहरति। अत इति। एतेनाभानाभानप
क्षयोरुभयोरपि दोषोक्तिः। अतः कारणादात्मनोऽसौ
परमानंदता भानेऽपि प्रतीतौ सत्यामपि अभानता प्रतीति

अभानेन परप्रेमभानेन विषयस्पृहा। अतो
भानेऽप्यभाता सौ परमानंदतात्मनः॥११॥ अ
ध्येतृवर्गमध्यस्थपुत्राध्ययनशब्दवत्। भाने
ऽप्यभानं भानस्य प्रतिबंधेन युज्यते॥१२॥॥॥

भवति॥११॥ ननु एकस्य युगपद्भानाभाने न युज्येते। इत्या·
शंक्य किमिदमयुक्तं भूतद्वयस्य उपपत्तिरहितत्वं वा
नायस्मात् दृष्टत्वदिति। अध्येतृणां वेदपाठकानां वर्गः
समूहस्तस्य मध्ये तिष्ठतीति। अध्येतृवर्गमध्यस्थः स चा·
सौ पुत्रश्चेति तथा तस्याध्ययनेन तत्कर्तृकपठनेन तस्य श
ब्दोऽपि निर्धार्यावहितस्यापि तत्पितुः समानोऽपि सामान्यतो भा
सते न विशेषतः। अयमस्मत्पुत्रध्वनिरिति निर्धारणेनास्यापि भा
नेऽप्यभानं भवतीत्यर्थः। द्वितीयं प्रत्याह भानस्येति। भाने·
ऽप्यभानं मिलनेन दृष्टानुगुणजनीयभानस्य स्फुरणस्य प्र
तिबंधनेन कर्मणा लक्षणेन भानेऽप्यभानं संभाव्यतः॥
प्रतीतावपि विशेषाकारेणाप्रतीतिरुपपद्यत इत्यर्थः

कोसौ प्रतिबंधो यस्येत्यत आह। प्रतिबंध इति। अस्ति भातीति
व्यवहारार्हवस्तुनि प्रसिद्धिविषये भाति प्रकाशते इत्येवंप्र
कारं व्यवहारमर्हतीत्यस्ति भातीति व्यवहारार्हं तद्व
स्तु चेति तन्मयानस्मिन् तं पूर्वोक्तं व्यवहारं निरस्य निराकृ
त्य विरुद्धस्य नास्ति न भातीत्येवंरूपस्य तस्य व्यवहारस्यो
त्पादनं जननं प्रतिबंध उच्यते ।।१३।। उक्तलक्षणस्य प्रतिबं
धस्य कारणं दृष्टान्तदार्ष्टान्तिकयोः क्रमेण दर्शयति ।। त
स्येति। पुत्रध्वनिश्रुतौ पुत्रध्वनिश्रवणलक्षणे दृष्टान्ते तस्य
प्रतिबंधस्य हेतुः कारणं समानाभिहारो बहुभिः। सहप

प्रतिबंधोऽस्ति भातीति व्यवहारार्हवस्तुनि । त
न्निरस्य विरुद्धस्य तस्योत्पादनमुच्यते ।।१३।।
तस्य हेतुः समानाभिहारः पुत्रध्वनिश्रुतौ । इ
हानादिरविद्यैव व्यामोहैकनिबंधनं ।।१४।। चि
दानंदमयब्रह्मप्रतिबिंबसमन्विता । तमोरजः
सत्त्वगुणा प्रकृतिर्द्विविधा च सा ।।१५।। ।।

टने इह दार्ष्टान्तिके व्यामोहैकनिबंधनं व्यामोहानां विप
रीतज्ञानानामेकनिबंधनं। मुख्यकारणमनादिरुत्पत्ति
रहिताविद्या वक्ष्यमाणा प्रतिबंध स्य हेतुरित्यर्थः ।।१४।। इ
दानीं प्रतिबंधहेतुभूतामविद्यां व्युत्पादयितुं तन्मूलभूतां
प्रकृतिं व्युत्पादयति। चिदानंदमयेति। सच्चिदानंदरूपं ब्र
ह्म तस्य प्रतिबिंबेन प्रतिच्छायया समन्विता युक्ता तमोरजः
सत्त्वगुणा सत्त्वरजस्तमोगुणानां साम्यावस्थायां सा प्रकृ
पं॰ प्र तिरित्युच्यते। सा च द्विविधा द्विप्रकारका भवति ।। चकारा
५ द्वक्ष्यमाणं प्रकारान्तरं सूचयति ।।१५।। ।।

सद्भेदेन कं द्वैविध्यमेव दर्शयति। सत्त्वशुद्ध्यविशुद्धिभ्यामि
ति। सत्त्वस्य प्रकाशात्मकस्य गुणस्य शुद्धिर्गुणांतरेणाक
लुषीकृतता। अविशुद्धिर्गुणांतरेण कलुषीकृतता ताभ्यां
ते च द्वे विधे मायाऽविद्ये मायेत्यविद्येति च मते संमते। विशु
द्धसत्त्वप्रधाना माया मलिनसत्त्वप्रधानाऽविद्येत्यर्थः॥ यद
ष्ठ मायाविद्ययोर्भेदं द्वैकस्तद्विदानीं दर्शयति। मायेति। मा
याबिंबो मायायां प्रतिफलितश्चिदात्मा तां मायां वशीकृ
त्य वर्तमानः सर्वज्ञः। सर्वज्ञत्वादिगुणक ईश्वरः स्यात्॥ अ
अविद्यावशगोऽविद्यायां प्रतिबिंबत्वेन स्थितः। तस्मादन्य
स्तचिदात्मा प्राज्ञो जीवः स्यात् स च तद्वैचित्र्यात्तस्या अविद्या
या उपाधिभूताया वैचित्र्यादविशुद्धितारतम्यादनेकधा॰

सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते॥
मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः॥१६
अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा॥ सा
कारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान्॥१७

नेकप्रकारो देवतिर्यगादिभेदेन विविधो भवतीत्यर्थः॥ य
थामुञ्जादिषीकैवमात्मा पुण्यापुण्यप्रवृत्तशरीरवृत्त्या द्वै
वैधपरं ब्रह्मैव जायते। तत्तन्नरपशुशरीरवर्तितया हि विवितस्य
जीवस्य परं ब्रह्मत्वं दर्शयति। तत्र तानि कानि शरीरा
णि तदुपाधिको वा जीवः। किंरूपो भवतीत्याकांक्षायाम
त्सर्वं क्रमेण व्युत्पादयति। सा कारणशरीरमित्यादिना
सेति। सा अविद्या कारणशरीरं स्थूलसूक्ष्मशरीरादिका
रणभूतप्रकृत्यवस्थाविशेषत्वात् कारणोपचारात्
शीर्यते नत्वज्ञानेन नश्यतीति शरीरं स्यात्। तत्र कारणश
रीरेऽभिमानवान् तादात्म्याध्यासेनाहमित्यभिमानवान्
जीवः प्राज्ञः प्रज्ञा अविनाशिस्वरूपा अनुभवरूपा यस्य शुद्धि
स प्रज्ञः प्रज्ञ एव प्राज्ञस्तथा पञ्चनामकः स्यादित्यर्थः॥ १७॥

क्रमशो मं सूक्ष्मशरीरं तदुपाधिकं जीवं च सृष्ट्वा स्थितेन ।
कारणेन कार्यादिसृष्टिमाह ॥ नमः प्रधानप्रकृते इति ॥ त
त्रैमायवेषां प्राणादीनां भोगाय सर्वेश्वरः खमानाकारसि
दृष्ट्यै नमः प्रधानप्रकृते तस्मै गुणप्रधानायाथ प्रकृतेः सू
वीकार्योपादानकारणभूतायाः सकाशात् ॥ ईश्वरात्तु·
याईशानादिशक्तिप्रकाशनगादधिष्ठानतयाईशापूर्व
कसर्जनेक्षारूपयानिमित्तकारणभूतयावियदादीनिसृष्टि ।

नमः प्रधानप्रकृतेस्तद्योगाधीश्वरात्तथा ॥ वि
यत्पवनतेजोऽम्बुभुवो भूतानि जज्ञिरे ॥ पृ ॥ सत्वां
शैः पंचभिस्तेषां क्रमाद्धीन्द्रियपंचकं ॥ श्रोत्रत्व
गक्षिरसनघ्राणाख्यमुपजायते ॥ १८ ॥ ॥

यिक्तानि पंचभूतानि जज्ञिरे प्रादुर्भूतानि उत्पन्नानीत्यर्थः
॥ भूतसृष्टिमभिधाय भौतिकसृष्टिमभिदधानः प्रादौ ज्ञा
नेन्द्रियसृष्टिमाह ॥ सत्वांशैरिति ॥ तेषां वियदादीनां पंचभिः
सत्वांशैः सत्वगुणभागैरुपादानभूतैः ॥ श्रोत्रत्वगक्षिरस
नघ्राणाख्यं धीन्द्रियपंचकं धीन्द्रियाणि ज्ञानेन्द्रियाणि तेषां पं
पं·श्र चकं क्रमादुपजायते ॥ एकैकभूतसत्वांशादेकैकमिन्द्रियं
९ जायत इत्यर्थः ॥ १८ ॥ ॥ ॥ ॥

सत्वांशानां प्रत्येकं प्रसाधारणकार्याण्यभिधाय सर्वे
षां साधारणकार्यमाह। तैरिति। तैः सह सत्वांशैः सर्वैः
संभूय वर्त्तमानैरन्तःकरणं मनोबुद्ध्युपादानभूतं द्रव्यमु
पजायत इत्यनुषङ्गः। तस्यावान्तरभेदं सनिमित्तमाह
वृत्तिभेदेनेत्यादिना। अन्तःकरणं वृत्तिभेदेन परिणामभेदेन
द्विधा द्विप्रकारं भवति। वृत्तिभेदमेव दर्शयति। मनस इ
ति। विमर्शरूपं विमर्शः संशयात्मिका वृत्तिः सा स्वरूपं
यस्य तत्तथा। मनः स्यात्। निश्चयात्मिका निश्चयो ऽध्यव
सायः स आत्मा स्वरूपं यस्याः सा निश्चयात्मिका सा वृत्तिर्बु
द्धिः स्यात्॥२१॥ क्रमप्राप्तानां रजोंशानां प्रत्येकमसाधार

तैरन्तःकरणं सर्वैर्वृत्तिभेदेन तद्द्विधा॥ म
नो विमर्शरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका २१
रजोंशैः पञ्चभिस्तेषां क्रमात्कर्मेन्द्रियाणि तु
वाक्पाणिपादपायूपस्थाभिधानानि जज्ञि
रे॥२२॥तैः सर्वैः सहितैः प्राणो वृत्तिभेदात्स पञ्च
धा। प्राणो ऽपानः समानश्चोदानव्यानौ च ते पुनः

णकार्याण्याह। रजोंशैरिति। तेषां वियदादीनामेव पं
चभिः रजोंशैः रजोभागैरुपादानभूतैर्वाक्पाणिपाद
पायूपस्थाभिधानानि एतन्नामकानि कर्मेन्द्रियाणि क्रि
याजनकानीन्द्रियाणि जज्ञिरे॥२२॥ रजोंशानामेव साधार
णं कार्यमाह। तैरिति। तैः सर्वैः सहितैः संभूय मिलितैः का
रणं गतैः प्राणो जायत इति शेषः। तस्यावान्तरभेद
माह वृत्तिभेदादिति। स प्राणो वृत्तिभेदात्प्राणापानादि
व्यापारभेदात्। पञ्चधा पञ्चप्रकारो भवति। वृत्तिभेदानेव
दर्शयति। प्राणो ऽपानः समानश्चेति। ते पुनस्तेन भेदाः दानव्यानौ च
प्राणापानादिशब्दवाच्या इत्यर्थः॥२२ ॥

यदर्थमात्मकाशादिप्राणानां नाम्नां स्फुटिकत्वानदिहानीदर्शय·
ति॥ बुद्धिकर्मेन्द्रियप्राणपंचकैरिति॥ बुद्धयोत्ताज्ञानिकर्माणि
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि॥ बुद्धीन्द्रि
याणि कर्मेन्द्रियाणि चेत्येवं बुद्धिकर्मेन्द्रियाणि प्राणाश्च
तैर्बुद्धिकर्मेन्द्रियप्राणैस्तेषां पंचकानि तैर्मनसा धिया च सा
केनेत्यर्थानि ग्रथवदपयाद्युक्तानि सप्तदशभिः सप्तदशसं
ख्याकैः सूक्ष्मं शरीरं भवति॥ तदेव संतानरूपात्सूक्ष्मं तल्लिंगमा
मिति॥ उच्यते वेदान्तेष्विति भावः॥ एवं सूक्ष्मशरीरमभिधाय·
तदभिमानित्वं प्रकृते प्राज्ञस्य तैजसत्वं तदीशस्य हिरण्यगर्भत्वमाह॥ प्रा
ज्ञ इति॥ प्राज्ञो मलिनसत्त्वप्रधानोऽविद्योपाधिको जीवस्त

बुद्धिकर्मेन्द्रियप्राणपंचकैर्मनसा धिया॥ शरी
रं सप्तदशभिः सूक्ष्मं तल्लिंगमुच्यते॥२३॥ प्रा
ज्ञस्तस्याभिमानेन तैजसत्वं प्रपद्यते॥ हिरण्य
गर्भतामीशस्तयोर्व्यष्टिसमष्टिता॥२४॥ राम

तैजसं प्राज्ञस्वात्मांतःकरणोपलक्षितलिंगशरीरेऽभिमाने
मतादात्म्याभिमानेन तैजसत्वं तैजसनामकत्वं प्रपद्यते प्रा
प्नोति। ईशः विशुद्धसत्त्वप्रधानमायोपाधिकः परमेश्वर।
स्तस्याभिमानेन हिरण्यगर्भसंज्ञत्वं प्रपद्यते र
मत एवं तयोस्तैजसहिरण्यगर्भयोर्लिंगशरीराभिमानित्वे·
समानेऽपि तयोः परस्परभेदः॥ किंनिबंधन इत्यत आह
तयोरिति॥ तयोस्तैजसहिरण्यगर्भयोर्व्यष्टित्वं समष्टित्वं च प
रस्परभवनिमित्तभेदहेतुरित्यर्थः॥२४॥ रामायनमो नमः

पं· ग्र
७

ईश्वरस्यसमष्टिरूपत्वेजीवानांव्यष्टिरूपत्वेचकारणमा।
ह समष्टिरिति। ईशः ईश्वरो हिरण्यगर्भः सर्वेषां लिंगशरी।
रोपाधिकानां तैजसानां स्वात्मतादात्म्यवेदनात्। स्वात्म
तादात्म्यस्यैकत्वस्य वेदनात्तज्ज्ञानात् समष्टिर्भवति। ततः ई
श्वरादन्ये जीवास्तु तदभावात्स्वतादात्म्यवेदनस्याभावाद्व्य
ष्टिसंज्ञया व्यष्टिशब्देन कथ्यंते॥२५॥ एवं लिंगशरीरतदुपा
धिकौ तैजसहिरण्यगर्भौ च दर्शयित्वा स्थूलशरीरोत्पत्ति।
सिद्ध्यर्थं पंचीक[illegible]निरूपयितुमाह। तद्भोगायेति। भगवानै·
श्व[illegible]दिषड्गुणसंपन्नः परमेश्वरः पुनः पुनरपि तद्भोगाय
तेषां जीवानां भोगाय च भोग्यभोगायतनजन्मने भोग्यस्या
न्नपानादेर्भोगायतनस्य जरायुजादिचतुर्विधशरीरजातस्य

समष्टिरीशः सर्वेषां स्वात्मतादात्म्यवेदनात्॥ तद
भावात्ततोऽन्ये तु कथ्यंते व्यष्टिसंज्ञया॥२५॥ तद्भो
गाय पुनर्भोग्यभोगायतनजन्मने। पंचीकरोति
भगवान्प्रत्येकं वियदादिकम्॥२६॥ द्विधा विधाय
चैकैकं चतुर्धा प्रथमं पुनः। स्वस्वेतरद्वितीयां
शैर्योजनात्पंच पंच ते॥२७॥ ॥

यजन्मने उत्पत्तये वियदादिकमाकाशादिभूतपंचकं प्रत्ये।
कमेकैकं पंचीकरोति। प्रपंचात्मकं पंचात्मकं संपादमानं
करोति॥ कथमेकैकस्य पंचपंचात्मकत्वमित्यत आह
द्विधेति। वियदादिकमेकैकं द्विधा द्विधा। [illegible]द्वि
धाशब्दः। विधाय कृत्वा भागद्वयोपेतं कृत्वेत्यर्थः। पुनस्पु
नरपि प्रथमं प्रथमभागं चतुर्धा भागचतुष्टयोपेतं विधा।
येत्यनुषज्यते। स्वस्वेतरद्वितीयांशैः स्वस्मात्स्वस्मादितरे।
षां चतुर्णां चतुर्णां भूतानां ये ये द्वितीयस्थूलभागास्तैस्त
तैस्सह प्रथमप्रथमभागांशानां चतुर्णां चतुर्णां मध्ये एकै
कस्य योजनात्ते वियदादयः प्रत्येकं पंचपंचात्मका भवंति

एवं पंचीकरणमभिधाय तैर्भूतैः स्थूलकार्यवर्गं दर्शयति
तैरंडस्तत्रेति। तैः पंचीकृतैर्भूतैरुपादानकारणभूतैर्ब्रह्मांडमु
त्पद्यते। तत्र ब्रह्मांडांतर्भुवनानि उपर्युपरिभागे वर्तमाना
भूरादयः सप्तलोकाः भूमेरधःस्थितान्यतलादीनि सप्तपा·
तालानि तेषु भुवनेषु तैस्तैः प्राणिभिर्भोक्तव्यान्यन्नादी
नि तत्तल्लोकोचितशरीराणि च तैरेव पंचीकृतैर्भूतैरीश्वर उ·
त्पादयतीत्यर्थः। एवं स्थूलशरीरोत्पत्तिमभिधाय तेषु स्थूलशरी
रेष्वभिमानवतो हिरण्यगर्भस्य समष्टिरूपस्य वैश्वानरसंज्ञ
कत्वं एकैकस्थूलशरीराभिमानवतां व्यष्टिरूपाणां तैजसा
नां विश्वसंज्ञकत्वं च भवतीत्याह। हिरण्यगर्भ इति। अस्मिन्

तैरंडस्तत्र भुवनभोग्यभोगाश्रयोद्भवः। हिर
ण्यगर्भः स्थूलेऽस्मिन्देहे वैश्वानरो भवेत्॥२७
तैजसा विश्वतां याता देवतिर्यङ्नरादयः॥ ते
पराग्दर्शिनः प्रत्यक्तत्त्वबोधविवर्जिताः॥२८

स्थूले देहे वर्तमानो हिरण्यगर्भो वैश्वानरो भवेत्॥२७॥ तेष्वे
व वर्तमानास्तैजसा विश्वा भवंति। तेषामवांतरभेदमाह
देवतिर्यङ्नरादय इति। इदानीं तेषां विश्वसंज्ञानां जी
वानां तत्त्वज्ञानरहितत्वेन संसारापत्तिरूपकास्फुटत्वात्तस्मा।
कहृदयेनाह। ते पराग्दर्शिन इति। ते देवादयः पराग्दर्शिनः
बाह्यानेव शब्दादीन् पश्यंति। न तु प्रत्यगात्मानम्। पराञ्चि खा·
नि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नांतरात्मन्।
ति श्रुतेः। ननु तार्किकादयो देहव्यतिरिक्तमात्मानं जानंती
पं·प्र त्याशंक्याह यद्यप्यात्मानं जानंति। तथापि श्रुतिसिद्धं तत्त्वं न
८ जानंतीत्याशयेनोत्तरमाह। प्रत्यगिति॥२८॥ रामः॥

ग्रतएवभोगायस्वर्लोकप्रभवायमनुष्यादिशरीराणि·
यिष्टायकर्मतत्रशरीरोचितानिकर्माणिकुर्वंतेसत्ता·
वेकवचनेनमस्रकर्मकर्तृदेवादिशरीरेमननफलंभुंज
नेचफलानुभवायोचितंतत्स्ज्ञानीयेच्छानुपयन्यानन्तस्य
थनानुष्ठानानुपपत्तेः॥एवंचनेमानास्तेजीवाः नदीमग्ना
इवपतिताःकीटाश्चावर्तादावर्तांतरमाशुव्रजंतोयथानिर्वृ
न तिंस्वल्पंलभंतेएवमाशुजन्मनोपिजन्मव्रजंतोनस्रखंनै॥
वलभंतेइतिश्लोकाएवंसंसारापन्नमभिधायतेभ्योनुपाय
दर्शयितुंदृष्टांतेनावदातत्वासत्कर्मपरिपाकात्तेषांमध्येकि
शुभकर्मपरिपाकात्केचनाकेनचिन्मकृपविशेष·

ऊर्व्वनेकर्मभोगायकर्मकर्तुंचभुंजतेनद्यां
कीटाइवावर्तादावर्तांतरमाशुते व्रजंतोजन्म
नोजन्मलभंतेनैवनिर्वृतिं॥ सत्कर्मपरि
पाकात्तेकरुणानिधिनोद्धृताः प्राप्यतीरतरुच्छा
यांविश्राम्यंतियथासुखं॥२॥ उपदेशमवाप्यै
वमाचार्यात्तत्त्वदर्शिनः पंचकोशविवेकेनल
भंतेनिर्वृतिंपराम्॥२४॥

णोद्धृतानदी प्रवाहेदृद्दर्निःसा
रिताःसंतस्तीरतरुच्छायांप्राप्ययथास्वंसुखंयथाभ
वतितथाविश्राम्यंति॥२३॥इदानींदृष्टांतसिद्धमर्थंदार्ष्टा·
न्तिकेयोजयति॥उपदेशमवाप्यैवेति॥एवंशुभेनप्रकारे
णपूर्वोपार्जितशुभकर्मपरिपाकवशात्तत्त्वदर्शिनः
प्रत्यगभिन्नब्रह्मसाक्षात्कारवतः आचार्यात्गुरोःसकाशा
त्॥उपदेशंतत्त्वमस्यादिवाक्यार्थज्ञानसाधनंश्रवणंव्या
ख्यानंमवाप्यसंपाद्यपंचकोशविवेकेन॥अन्नमयादी
नांपंचानांकोशानांविवेकेनचव्याख्यानेनविवेचनेनपरांनि·
र्वृतिंमोक्षसुखंलभंतेप्राप्नुवंति॥२४॥ २२॥ ३२

तैः कैः अन्नादयः पंच कोशाः इत्याकांक्षायां तानुद्दिशति अ
न्नमिति। अन्नं प्राणो मनो बुद्धिरानन्दश्चेत्येते पंच कोशाः। बु
द्धिर्विज्ञानं तेषामन्नादीनां कोशशब्दाभिधेयत्वे कारणमा
ह तैरिति। तैः कोशैः खड्गप्रावृतकादिवत् आवृतः स्वरूप
भूत आत्मा विस्मृत्या स्वस्वरूपविस्मरणेन संसृतिं जननम
रणादिरूपं संसारं व्रजेत् प्राप्नुयात्। कोशा यथा कोशकारकृ
मेरावरकत्वेन कोशा इति तद्वदन्नादयोऽप्यहं यानंदत्वावरणाव
रकत्वेनात्मनः कोश इव तां कोशा इत्युच्यन्ते इत्यर्थः ॥३३॥
तेषां कोशानां स्वरूपं क्रमेणानुवादयति। स्यात्पंचीकृते
त्यादिना मोदादिवृत्तिभिरित्यन्तेन सार्धश्लोकद्वयेन पंचीकृ

अन्नं प्राणो मनो बुद्धिरानन्दश्चेति पंच ते कोशा
स्तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेत् ॥३३॥
स्यात्पंचीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः ।
लिंगे तु राजसैः प्राणैः प्राणः कर्मेन्द्रियैः सह ॥३४॥
सात्त्विकैर्धीन्द्रियैः साकं विमर्शात्मा मनोमयः ।
तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका ॥३५॥

तेभ्यो भूतेभ्य उत्पन्नः स्थूलो देहोऽन्नसंज्ञकोऽन्नमयः कोशः स्या
त्। कोशः स्यात् प्राणस्तु प्राणमयस्तु कोशः। लिंगे लिंग
शरीरे वर्तमानैः राजसैः रजोगुणकार्यभूतैः प्राणैः प्राणापा
नादिभिः पंचभिर्वागादिभिः कर्मेन्द्रियैः सह दशभिः स्यात्।
प्राणमयस्तु कोशः ॥३४॥ सात्त्विकैरिति विमर्शात्मा संशया
त्मकः। पंचभूतसत्त्वकार्यं यन्मनस्तु कृतं सात्त्विकैः। प्रत्येकभू
तसत्त्वकार्यभूतैः धीन्द्रियैः श्रोत्रादिभिः पंचभिर्ज्ञानेन्द्रियैः साकं
सहितं मनो मयः कोशः स्यादिति पूर्वेण सह संबंधः। निश्चयात्
पं॰ ३ त्मिका धीः तेषामेव सत्त्वकार्यरूपा बुद्धिस्तैरेव पूर्वोक्तैर्ज्ञाने
५ न्द्रियैरेव साकं सहिता सती विज्ञानमया विज्ञानमयाख्यः को

कारणे कारणशरीरभूतायामविद्यायां प्रतिबिंबितं सत्त्वं सा
क्षितं तन्मोदादिवृत्तिभिः प्रियमोदप्रमोदाख्याभिर्वृत्तिभिरानंदा
भिमोदयं जतेः सहितमानंदमयम् आनंदमयाख्यकोशः स्या
दिति॥ नन्वस्थूलशरीरादीनामन्नमयादिशब्दवाच्यत्वे सत्य
वात्मनस्तद्रूपत्वेन तत्तन्मयत्वमुपक्रम्य तस्मात्केन स्यादित्यत आ
हान्नमयादिकोशैस्तादात्म्यात्तन्मयत्वं श्रुतौ तन्मयतो। आत्मा तत्त
दात्मा मनोमय इत्यादि श्रुतत्वात्तात्मनोऽन्नमयादिशब्दवा
च्यत्वं कथमुच्यते। इत्याशंक्य देहादीनामन्नादिविकारत्वे
नान्नमयादिशब्दवाच्यत्वेऽपि आत्मनस्तेन तेन कोशेन स
हैतादात्म्याभिमानादित्याह तदिति। आत्मा अन्नमयात्मा त
त्तत्कोशैः तेन तेन कोशेन सहैतादात्म्यात् तादात्म्याभिमा

कारणे सत्त्वमानंदमयो मोदादिवृत्तिभिः॥ त
त्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत्॥१२
अन्वयव्यतिरेकाभ्यां पंचकोशविवेकतः॥
आत्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते॥१३॥ म

नां तत्तन्मयत्वं कोशमयः स्यादयवहारकालेऽन्नमयादि
कोशतादात्म्यादन्नमयादिशब्दवाच्यत्वमर्थः। न शब्दस्या
त्मनः कोशेभ्यो वैलक्षण्यं तत्त्वेनार्थः॥१२॥ कथं तर्हि वि
यस्यात्मनो ब्रह्मत्वं भवतीत्याशंक्य कोशेभ्यो विवेकाद्भव
तीत्याह अन्वयव्यतिरेकाभ्यामिति। अन्वयव्यतिरेकाभ्यां
वक्ष्यमाणलक्षणाभ्यां पंचकोशविवेकतः। पंचानां कोशा
नामन्नमयादीनां विवेकतः स्वस्यात्मनो विवेचनेन पृथ
क्करणेन। यद्वा पंचकोशेभ्योऽन्नमयादिभ्य आत्मनः॥ पृथ
क्करणेन स्वात्मानं स्वस्यात्मानं ततस्तेभ्यः कोशेभ्य उद्धृत्य उ
द्धृत्य निःकृष्य चिदानंदस्वरूपं निश्चित्य परं ब्रह्म पूर्वोक्तलक्ष
णं प्रपद्यते प्राप्नोति ब्रह्मैव भवतीत्यर्थः॥१३॥॥ ।।।।।

इदानीं विवृतिमावतरन्नन्वयव्यतिरेकौ दर्शयन्नित्यात्मानमेव ।
निश्चये समभवस्यायां स्थूलदेहस्याद्रव्यमयकोशस्याभानेऽपि
नैमित्तिकस्यात्मनः स्फुरीणां यज्ञानं स्वप्नमात्मनि हितेनेयत्स्फुरणा
मात्मिक समानात्मनोऽन्वयः तस्यामेव स्वप्नावस्थायां न ज्ञानेन
स्थात्मनः स्फुरणा सति प्रत्याभवभासनं प्रत्यक्षस्य स्थूलदेह ।
स्यानवभासनं प्रतीतिर्व्यतिरेकः स्थूलदेहस्येति शेषः ।
प्रसिद्धकरणोऽन्वयव्यतिरेकयोस्तावन्मात्रकमेव निश्चयहेतुत्वात् ।
यत्रैवं स्थूलदेहस्यानात्मत्वावबोधकत्वमन्वयव्यतिरे
कौ दर्शयित्वा लिङ्गदेहस्यानात्मत्वावगमकौ तौ दर्शयति लि
ङ्गाभानेऽपीति सुषुप्तावस्थायां लिङ्गाभानेऽपि लिङ्गस्य सूक्ष्मदेह
स्याभानेऽपि प्रतीतेरात्मनो भानमन्वयः स्वप्नावस्थायां हि तेनात्मनः

प्रभाने स्थूलदेहस्य स्वप्नेऽपि यज्ञानमात्मनश्च सोऽन्व
योऽव्यतिरेकः स्वज्ञाने स्थानवभासनात् एवं लिङ्ग
भाने सुषुप्तावस्थायामात्मनो भानमन्वयः व्यतिरेक
स्तज्ज्ञाने लिङ्गस्याभानं प्रत्यक्षेण ॥ इत्यादिना हि वैका
हि विकारस्य कोशात्मानो विधेयं । तेहि तत्र
णात्मस्वाभेदमात्रमप्यतः कृतकृत्यमात्रं व्यक्तम् ॥ ॥ ॥

स्फुरणं चात्मनोऽन्वयः स्वप्ने तज्ज्ञाने प्रात्मभाने लिङ्गस्याभा
ने लिङ्गदेहस्य स्फुरणं व्यतिरेक इत्युच्यते । इत्यादिना पञ्चको
शविवेचनमुपक्रम्य लिङ्गदेहविवेचनं प्रकृतमुपसंगतमि
त्याशङ्कायामात्मत्वादिकोशत्रितयस्य तत्रैवान्तर्भावात्प्रकृ
तासंगतिरित्याशयेनाह हि वैकाद्भिर्ति । तस्य लिङ्गशरीरस्य विवे
कादि हि वेचनात्मात्मनो विषयपञ्चमयकाः कोशाद्विविक्ताः प्रा
त्मनः पृथक्कृतास्तु कृतरूपत्रयात्मेति हेतवेऽभिहितं यस्मात्का
रणात्मेशात्मस्याद्यस्तत्र तस्मिन् लिङ्गशरीरे गुणावस्थाभेद
मात्रात्मनामोः स्वरसतो स्वस्वाभेदमात्रात्मप्रधानभावेना
वस्थानविशेषादेव पृथक्कृतानामभेदेन निर्दिष्टा इत्यर्थः ॥ १ ॥

प॰ ३
१०

इदानीं मार्गं दर्शयन्कोशानेन निवर्त्तितस्य कारणशरीर ।
स्यापि विवेचनोपायमाह । सद्घनस्यानस्येति । समाधौ च स्वप्ना
लक्षणयोः समाध्यवस्थयोः सद्घनभाने सद्घनमित्याद्युपल
ब्धितस्य कारणदेहरूपस्याज्ञानस्याप्रतीतो ज्ञानमनन्त
श्लोके । यथा रोगज्ञानेन पवभानं स्फुरणं पदार्थस्य सद्घन
नोऽन्वयः अज्ञानभाने अज्ञानस्फूर्तौ सत्यां सद्घनस्यानवभासन
सद्घनस्फुरणविशिष्टस्याज्ञानस्याप्रतीतिरेव व्यतिरेकस्तस्य ।
ति । सुप्तावस्थायाः स्वप्नजाग्रत्साम्यं समयादिर्व्योमाभिधीयते तेन
परस्परं व्यावर्त्यमाने सुप्तिरूपमत्यायुस्त्वमान्त्वं । यथेक्षुव्या
वर्त्यमाने स्वपिति व्यावर्तनेनान्वयोऽभिधीयते ॥ यथा क्रमस्येम्यः
सूत्रं यथाकाशेऽपि दिव्यक्तिर्व्योमेत्युत्पत्तिरिति ॥ ५१ ॥ एवमन्व

सद्घनभाने भानं तु समाधावात्मनोऽन्वयः ।
व्यतिरेकस्तदभाने सद्घनस्यानवभासनम् ॥ ५१ ॥
यथा मुञ्जादिषीकैवमात्मा युक्त्या समुद्धृतः ।
शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायते ॥ ५२ ॥

व्यतिरेकाभ्यां कोशपञ्चकादिभ्यः स्वात्मनो ब्रह्मत्वप्रा
प्तिर्भवतीत्यर्थः । तत्प्रतिपादिकां मन्त्रदृष्टान्तमाह । मुञ्जादीति ।
यात्मेमादिकान्विपाकक्रमसूनिम्बितोऽकरतिमर्थ
नः पठति । यथेति मुञ्जादीति । यथा येन प्रकारेण मुञ्जादेर्ना
मकात्तृणविशेषादिषीका गर्भस्थं कोमलं तृणं । स
बहिरावारकत्वेन स्थितानां स्थूलपत्राणां विभजनेन ल
क्षणेनोपायेन समुद्ध्रियते । एवमात्मापि युक्त्या अन्वयव्य
तिरेकलक्षणोपायेन शरीरत्रितयात्स्थूलसूक्ष्मकारणाख्याद्यथा
धीरैः स्ववर्णादिसाधनसंपन्नैरधिकारिभिः समुद्धृतः
पृथक्कृतस्सन्परं ब्रह्मैव जायते चिदानन्दरूपत्वस्य लक्ष
णस्योभयोरविशिष्टत्वादित्यभिप्रायः ॥ ५२ ॥ ॥ ॥

एतावता ग्रंथसंदर्भेण सफलस्यतत्त्वस्य निरूपितत्वा-
दुत्तरग्रंथभागस्यानारंभप्रसंग इत्याशंकायां तदारंभसिद्ध-
ये वृत्तानुकीर्तनपूर्वकमुत्तरग्रंथस्य तात्पर्यमाह ॥ परात्म-
नयति ॥ एवमुक्तेन प्रकारेण परापरात्मनोस्तत्त्वंपदार्थ-
योः परात्मजीवात्मनोरेकता अभिन्नता युक्त्या लक्षणा सा-
मग्र्यदर्शनाद्युपायेन संभाविता अंगीकारिता साप्येकता ता-
त्वमस्यादिवाक्यैः समभागत्यागेन विरुद्धांशपरित्यागे-
न लक्ष्येलक्षणया हृत्याबोध्यते ॥ अथ तत्त्वमसीतिवाक्या-
र्थज्ञानस्य तत्त्वमादिपदार्थज्ञानपूर्वकत्वात् ॥ तत्पदस्य वाच्य-
मर्थं तावदाह ॥ जगत इति ॥ अस्य स्थितिसंहारलक्षणप्रलना

परापरात्मनोरेवं युक्त्या संभावितैकता ॥ तत्त्व-
मस्यादिवाक्यैः सा भागत्यागेन लक्ष्यते ॥ ज-
गतो यदुपादानं मायामादाय तामसीं ॥ नि-
मित्तं शुद्धसत्त्वां तामुच्यते ब्रह्म तद्गिरा ॥ ४४ ॥ य-
दा मलिनसत्त्वां तां कामकर्मादिदूषितां ॥ आ-
दत्ते तत्परं ब्रह्म त्वंपदेन तदोच्यते ॥ ४५ ॥ ताम-

सीं तमोगुणप्रधानां मायामादायोपाधित्वेन स्वीकृ-
त्य जगतश्चराचरात्मकस्य कार्यवर्गस्योपादानं प्रख्यासा-
धिष्ठानं शुद्धसत्त्वां विशुद्धसत्त्वप्रधानां तामुपाधित्वेन स्वी-
कृत्य निमित्तं उपादानापः भिन्नं कर्तृ भवति ॥ निमित्तोपा-
दानोभयरूपं ब्रह्म तद्गिरा तत्त्वमसिवाक्यस्थेन तत्पदेनो-
च्यते ॥ ४४ ॥ त्वंपदवाच्यार्थमाह ॥ यदेति ॥ तदेव ब्रह्म यदा य-
स्यामवस्थायां मलिनसत्त्वामीषद्रजस्तमोमिश्रेण मलिन-
सत्त्वप्रधानामत एव कामकर्मादिदूषितां तामविद्याशब्दा-
पं० ३ वाच्यां मायामादत्ते उपाधित्वेन स्वीकरोति ॥ तदा त्वंप-
॥ देनोच्यते ॥ ४५ ॥ ४५ ॥ ४५ ॥ ४५ ॥ ४५ ॥ ४५ ॥

एवं तत्त्वंपदार्थावभिधाय वाक्यार्थमाह ॥ त्रितयीमिति ॥ त्रि-
तयीमपि त्रिप्रकारामपि तमःप्रधानविशुद्धसत्त्वप्रधान-
मलिनसत्त्वप्रधानत्वभेदेनोक्तामेतामेव परस्परविरोधिनी-
मायां प्रकृतिं परित्यज्य अखण्डं भेद रहितं सच्चिदानन्दं ब्र-
ह्म महावाक्येन लक्ष्यत इत्यर्थः ॥ ४४ ॥ नन्वेवं लक्षणया
वाक्यार्थबोधनं क्व दृष्टमित्याशङ्क्याह ॥ सोऽयमिति ॥ सोऽयं देव-
दत्त इत्यादिवाक्येषु तदिदन्तयोः ॥ तद्देशकालवैशिष्ट्यल-
क्षणयोर्धर्मयोर्विरोधादेकत्वानुपपत्तेर्भागयोर्विरुद्धांशयो-
स्त्यागे कृते ऐक्याश्रयो देवदत्तस्वरूपमेकमेव यथा लक्ष्यते ॥
४५ ॥ एवं दृष्टान्तमभिधाय दार्ष्टान्तिकमाह ॥ मायाविद्येति ॥ ए-

त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीम् । अखण्डं सच्चिदानन्दं
महावाक्येन लक्ष्यते ॥ ४४ ॥ सोऽयमित्यादिवाक्येषु विरोधात्त-
दिदन्तयोः । त्यागेन भागयोरेक आश्रयो लक्ष्यते यथा ॥ ४५ ॥
मायाविद्ये विहायैवमुपाधी परजीवयोः । अखण्डं सच्चिदान-
न्दं परं ब्रह्मैव लक्ष्यते ॥ ४६ ॥ सविकल्पस्य लक्ष्यत्वे लक्ष्यस्य स्या-
दवस्तुता । निर्विकल्पस्य लक्ष्यत्वं न दृष्टं न च संभवि ॥ ४७ ॥

वं सोऽयं देवदत्त इत्यादिवाक्ये यथा देवदत्तस्वरूपमेकमेव
लक्ष्यते तद्वत् परजीवयोरुपाधिभूते मायाविद्ये विवेकेन वि-
हाय परित्यज्य अखण्डं भेदरहितं सच्चिदानन्दं परं ब्रह्मैव महा-
वाक्येन लक्ष्यते ॥ ४६ ॥ ननु किं महावाक्येन लक्ष्यं सविकल्प-
कमुत निर्विकल्पकमिति विकल्प्य प्रथमे पक्षे दोषमाह
पूर्ववादी ॥ सविकल्पस्येति ॥ सविकल्पकस्य विकल्पेन
विपरीतत्वेन कल्पितेन नामजात्यादिरूपेण सह वर्तत इ-
ति सविकल्पं तस्य लक्ष्यत्वे वाक्येन बोध्यत्वे लक्ष्यस्य वाक्या-
(भिन्नस्य ^) र्थतया लक्ष्यस्यावस्तुता स्यान्मिथ्यात्वं स्यात् । द्वितीये दो-
षमाह निर्विकल्पस्येति ॥ निर्विकल्पस्य नामजात्यादिर-
हितस्य लक्ष्यत्वं न दृष्टं लोके न क्वापि दृष्टं न च संभवि ॥ उ-
पपत्त्यामानमपि न भवति ॥ लक्ष्यत्वधर्मवतो निर्विकल्पक-

विकल्पाभिन्नस्य निर्विकल्पस्याप्यत्वे
नासंभवात् ^

सिद्धांती जल्पन्न मत्वा नेदं बोधमिति निर्विकल्पपूर्वकं दोषमा
ह। विकल्पश्चिन्नविकल्पस्य निर्विकल्पस्य वा लक्षणं
मिति। यो विकल्पस्तथा कृतः स किं निर्विकल्पस्य उत सवि
कल्पस्य वा भवेत्। प्रायेण प्रथमे पक्षे आह निष्क्रियो का आ
वानपक्षे। अन्यत्र हि द्वितीयपक्षे नवस्थादयः। तथा हि।।
सविकल्पस्य विकल्पश्चेत्तत्र विकल्पेन सह वर्तते इत्यत्र त
तीयांत विकल्पपदेन प्रथमांतविकल्पपदेनैकपदविक
ल्पः। भिद्यते नेहो वा। एकपदं चेत् स्वयमेकपदविकल्प
स्य विशेषणतया स्वयमेकस्यात्मनो विकल्पस्यैव दात्मा
त्रयता। द्वौ चेत् दातृतीयांत शाब्दनिर्दिष्टस्यापि विकल्पस्य।
विकल्परूपत्वात् तदात्मत्रयस्य अपि सविकल्पता महिशेषण।
मं. भूतो विकल्पः किं प्रथमांत शाब्दनिर्दिष्ट एव विकल्प उत नान्य।।
विकल्पो निर्विकल्पस्य सविकल्पस्य वा भवेत्। प्राये आ
हतिरन्यथानवस्थानात्माश्रयादयः।। सं द्रव्यगुणक्रियाजा
ति द्रव्य संबंधयवलक्षण। समं तेन स्वरूपस्य सर्वमेतदितीष्य
ते।५।।। व्याप्त्वाः। प्रायेण प्रश्नोत्काश्रयता। द्वितीये पि पूर्वमि
विशेषणीभूतो विकल्पः किं प्रथमांत शाब्दनिर्दिष्ट उतेतं
रो न वा। प्रथमे विकल्पके कारणतिर द्वितीये पि तस्या अन्यत्वः तस्मा
दन्यस्त्वनवस्थानात्मत्वानिति। एवं केवलमनेवेदं दूषणम
पितु सर्वैरेवाविधं विकल्पपूर्वकं दूषणं प्रसरतीत्याह। इद
मिति। इदं विकल्परूपं तत्र जातिगुणक्रियाजातिद्रव्यसंबं
धबलक्षण। गुणादिस्वरूपात्तेषु पंचसु वस्तुषु समं तथा हि
गुणाः किं निर्गुणो वर्तते उत गुणवति क्रियापि क्रियावति
नैव वर्तते क्रियावति वा। आद्ये अव्यावृत्तः ग्रन्थात्मा अपाद्य
इति सर्वैवैव दूषणं तद्विदमसंकुलतरं वो किं स्वतंत्रमिति शो
पं.३ का हेत्वेनेति। नेनैवविकल्पसामग्रतत्वेनेन स्फुरणादिकं
१२ सर्वस्वरूपस्य तीथ्यते गुणादय। सर्व वस्तुस्वरूपे वर्तते

भवत्वेवमन्यत्र प्रकृते किं मायातमित्यत आह॥ विकल्पत-
दभावाभ्यामिति। विकल्पतदभावाभ्यां विकल्पेन विकल्पा-
भावेन वा असंस्पृष्टात्मवस्तु निःसंस्पर्शः रहितेः परमात्मवस्तु
निर्विकल्पितं न वल्लत्वं सर्वथा यात्स्तु विकल्पितत्वं नाम-
सविकल्पस्य वा निर्विकल्पस्य वेति पूर्वोक्तेन विषयीकृतत्वं
लतत्वं लक्षणा। तस्यास्तात्पर्यं संबंधः संयोगादिः रूपादिशब्दे-
नस्वादयोः पृथक्त्वेन शाब्दो व्यापारो। ननु द्रव्यनाम गुणाना-
माश्रयो द्रव्यं समवायिकारणं द्रव्यमिति वाना किं केवलत्वि-
ते। कर्मव्यतिरिक्तत्वे सति जातिमात्राश्रयो गुणाः॥ नित्य-
मेकमनेकवृत्ति सामान्यमिति लक्षितानां जातिः संयोगावि

विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तु नि-
विकल्पितत्वलक्षणं सर्वथा यत्र कल्पिताः।
५१। इत्याकांक्षा तदर्थानुसंधानेन प्रवर्तनं भवेत्॥
शुक्रा संभावितत्वानुसंधानं मननं ततः॥५२

योगयोरसंवायिकारणं ज्ञानीयं कर्मैति लक्षितानां क्रिया
एते सर्वे स्वरूपेकल्पिता पदार्थाः॥५१॥ एतावता ग्रंथसं-
दर्भेण किमुक्तं भवतीत्याकांक्षायां फलितमाह। इत्यमि-
ति। इत्यज्ञानतो यदुपादानमित्यादि ग्रंथज्ञानतो लघुकारे-
णावाक्येस्तन मस्यादिवाक्येस्तदर्थानुसंधानं तेषां वाक्या-
नामर्थस्यमीवद्यतात्यौरेकत्वलक्षणस्यानुसंधानं प्रव-
णं भवेत्। शुक्रा शब्दस्पर्शादयो वेदा इत्यादिना पदार्थ-
त्मनो रवेः शुक्रा संभावितेकत्वेन ग्रंथसंदर्भेण लघु-
करणा संभावितत्वानुसंधानं श्रुतस्यार्थस्योपपद्यमानत्व-
ज्ञानं यद्द्रस्तितन्मननमित्युच्यते॥५२॥॥ ॥ ॥॥ ॥

इदानीं निदिध्यासनमाह। ताभ्यामिति। ताभ्यां श्रवणमनना
न् भ्यां निर्विचिकित्सेऽर्थे निर्गता विचिकित्सा संशयो यस्मा
त्सोऽयं निर्विचिकित्सस्तस्मिन्नर्थे विषये स्थापितस्य धारणया
विषये वर्तमानस्य चेतसो देशबन्धश्चित्तस्य धारणेति पत
ञ्जलिनोक्तत्वात्। एकतानत्वमेकाकारवृत्तिप्रवाहवत्त्व
मेतन्निदिध्यासनमुच्यते। हि प्रसिद्धं योगशास्त्रे तत्र प्रत्यै
कतानता ध्यानमिति। ५४। तस्यैव निदिध्यासनस्य परिपा
कदशारूपं समाधिमाह। ध्यातृध्याने इति। निदिध्यासने
तावद्ध्यातृध्याने ध्येयं चेति त्रितयं भासते। तत्र यदा चित्तमभ्या

ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य य
त्। एकतानत्वमेतद्धि निदिध्यासनमुच्यते ॥
५४ ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचर
निवातदीपवच्चित्तं समाधिरभिधीयते ॥५५

सवशेन। ध्यातृध्याने ध्यातारं ध्यानं च क्रमात्परित्यज्य ध्ये
यैकगोचरं ध्येयमेकमेव गोचरो विषयो यस्य तथाविधं नें
भवति। तदा समाधिरित्युच्यते। तत्र दृष्टान्तः। निवातदीप
वदिति। वातवर्जिते प्रदेशे वर्तमानो दीपो यथा निश्चलो भ
वति तद्वदित्यर्थः॥ ननु समाधौ वृत्तीनामनुपलम्भाद्ध्ये
यैकगोचरत्वमपि निश्चेतुं न शक्यत इत्याशङ्क्य वृत्तिस
द्भावस्यानुमानगम्यत्वान्नैवमित्याह। वृत्तय इति। आ
पं॰ ७ त्मगोचराः आत्मगोचरो विषयो यासां ता वृत्तयः। तदा
।३ नीं समाधिकाले। अज्ञाता अप्रतीता अपि उत्थितस्य समाधेरुत्थित

स्य ॥ सत्तु स्थिताद्भस्मात्स्मरणादेतावंतं कालं समा-
हितो ध्रुवमित्येवं रूपादनुमीयंते ॥ यथा तस्यैतेन तन्द-
नुभूतमिति यामेलोकस्मिन् हृत्वादिस्मयंथ ॥५४॥ नन्तु तदा-
नीं हेतुस्मारकस्य यत्नाभावात्कथं स्मृत्यनुवृत्तिरित्याशंक्य
तात्कालिकप्रयत्नाभावेपि प्राथमिकादेव प्रयत्नाद दृढत्वा-
दिसहकारिसहिताद्भवतीत्याह स्मृतीनामिति ॥ ध्येयैक-
गोचराणां स्मृतीनामनुवृत्तिस्तत्प्रवाहरूपेणानुवृत्तिस्त-
त्प्रथमादपि प्रयत्नात्समाधिपूर्वकालीनादपि पुरः पु-
नःकृतात्साभ्यासः गुणविशेषः । कर्माकृतकृतयोगि

वृत्तयस्तत्तदानीमतानात्प्रत्यात्मगोचराः ॥
स्मरणादनुमीयंते सुस्थितस्य सुस्थितात् ॥५८
वृत्तीनामनुवृत्तिस्तु प्रयत्नात्प्रथमादपि ॥ पु-
रःसकृदभ्याससंस्कारसचिवाद्भवेत् ॥५९
यथा दीपो निवातस्थ इत्यादिभिरनेकधा ॥ भ-
गवानिममेवार्थमर्जुनाय समुपपादयत् ॥५५॥

नः त्रिविधमितरेषामिति पतंजलिनाप्युक्तत्वात् ॥ पुरः
सकृदभ्याससंस्कारः पुनः पुनः समाध्यभ्यासेन जनितो ।
भावनाख्यः संस्कारविशेषस्तदभ्यासः सहकारिकारणमाभ्यां
सह वर्तमानाद्भवति ॥५५॥ नन्वयं समाधिः पूर्वाचार्यैर्निरू-
पितो न वेत्याशंक्य सर्वज्ञकृष्णा श्रीकृष्णेनैव निरूपि-
तत्वान्नैवमिति ॥ यथा दीप इति ॥ यथा दीपो निवातस्थो नें-
गते सोपमा स्मृतेत्यादिभिः श्लोकैरनेकधा नानाप्रकारेण
भगवान्ज्ञानैश्वर्यादिसंपन्न इममेव निर्विकल्पकसमा-
धिरूपमर्थमर्जुनाय शिष्याय समुपपादयन् निरूपितवान् ॥ ५८

अस्य समाधेरवान्तरफलमाह । अनादाविति । अनादौ ।
स्पष्टं इहास्मिन्संसारे संचिताः संपादिताः कर्मकोटयः ॥
कर्मणां शुभाशुभलक्षणानां कोटयः समूहलक्षणा अ-
परिमितानि कर्माणीत्यर्थः । अनेन समाधिना विलयं या-
न्ति विनश्यन्ति । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे
इति श्रुतेः । ज्ञानाग्निः सर्वकर्माणीति स्मृतेश्च शुद्धो धर्मस्य
विलासः सर्वविषयान्निवर्तकत्वं साक्षात्काररूपश्च न भूतो ध-
र्मोऽभिवर्धते स्पष्टं ॥५१॥ ननु च किं प्रमाणमित्यत आह ध-
र्ममेघमिति । योगविदुत्तमा इति श्रायेन योगज्ञाः अलमस्य ।

अनादाविह संसारे संचिताः कर्मकोटयः । अने-
न विलयं यान्ति शुद्धो धर्मो विवर्द्धते ॥५२॥ ध-
र्ममेघमिमं प्राहुः समाधिं योगवित्तमाः । वर्ष-
त्येष यतो धर्मामृतधाराः सहस्रशः ॥९॥ अमु-
ना वासनाजाले निःशेषं प्रविलापिते । समू-
लोन्मूलिते पुण्यपापाख्ये कर्मसंचये ॥१०॥

त्कारवर्णन इति यावत् इमं निर्विकल्पसमाधिं धर्ममेघं
प्राहुः स्पष्टं । यत उपपादयति वर्षतीति । यतः कारणादेष
निर्विकल्पसमाधिः धर्मामृतधाराः धर्मलक्षणा अमृतधाराः
सहस्रशो वर्षति तृणमेकं क्रतुशतस्यापीति श्रुतेः अतो
धर्ममेघं प्राहुरिति पूर्वेणान्वयः ॥९॥ इदानीं समाधेः परम
योजनमाह । अमुनेति । अमुना समाधिना वासनाजाले अ-
हंकारममकारकर्तृत्वाद्यभिमानहेतुभूते ज्ञानविरुद्धे सं-
पं.३ स्कारसमूहे निःशेषं यथा भवति तथा प्रविलापिते विना-
१५ शिते पुण्यपापाख्ये कर्मसंचये समूलोन्मूलिते समूलं य-
था भवति तथोन्मूलिते उद्धृते विनाशिते इति यावत् ॥१०॥

फलितमाह। वाक्यमिति। वाक्यं तत्त्वमस्यादिवाक्यम-
प्रतिबद्धमसत्कर्मवासनाभ्यां प्रतिबन्धरहितं सत्प-
रोक्षावभासिते पूर्वं परोक्षतया प्रकाशिते तेनैव कराम-
लकवत्। करस्थितामलकगोचरमिवापरोक्षमप-
रोक्षतया तत्त्वावभासनसमर्थं बोधं ज्ञानं प्रसूयते सं-
जनयति। ९५। इदानीं परोक्षज्ञानस्य फलमाह। परो-
क्षमिति। देशिकपूर्वकं गुरुमुखाल्लब्धं शास्त्रं तत्त्वम-
स्यादिवाक्यजन्यं परोक्षं ससविज्ञानं बुद्धिपूर्वकृतानपू-

वाक्यमप्रतिबद्धं सत्परोक्षावभासिते
करामलकवद्बोधमपरोक्षं प्रसूयते॥ ९५॥
परोक्षं ससविज्ञानं शास्त्रं देशिकपूर्वकं॥
बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत्॥ ९६
अपरोक्षात्मविज्ञानं शास्त्रं देशिकपूर्वकं॥
संसारकारणाज्ञानतमसश्चण्डभास्करः॥ ९७

र्वकं यथा भवति तथा भूतं कृत्स्नं समस्तं पापं वह्निव-
द्दहतीति। ९६। इदानीमपरोक्षज्ञानस्य फलमाह। अपरो-
क्षेति। शास्त्रं देशिकपूर्वकं व्याख्यातमपरोक्षात्मविज्ञा-
नमपरोक्षतयात्मनो विज्ञानं संशयविपर्ययरहितं-
यत् ज्ञानं तत् संसारकारणाज्ञानतमसः संसारकारण-
यदज्ञानमविकृतदेवतमस्तस्य चण्डभास्करो मध्याह्नका-
लीनः। सूर्यवाद्यं तमसश्चण्डभास्कर इवाज्ञानतमसो नि-
वर्तकमित्यर्थः॥ ९७॥

ग्रंथाभ्यासफलमाह॥ इत्थमिति॥ इत्थमुक्तेन प्रका
रेण तत्त्वविवेकं तत्त्वस्य ब्रह्मात्मैकत्वलक्षणस्य विवेकं
कोशपंचकाद्विवेचनं विधाय कृत्वा तस्मिंस्तत्त्वे विधिव
च्छास्त्रोक्तप्रकारेण मनः समाधाय स्थिरीकृत्य विगः
लितसंसृतिबंधः॥ अपरोक्षज्ञानेन विनिवृत्तसंसारबंधः
सन्परं पदं निरतिशयानंदरूपं मोक्षं न चिरादचिरेणैव प्रा
प्नोति सम्यग्ज्ञानानंतरमेव मुक्तो भवतीत्यर्थः॥६५॥ इति
श्रीरामकृष्णाख्यविदुषा विरचिता प्रथमस्तत्त्वविवेकव्या

इत्थं तत्त्वविवेकं विवेकं विधाय विधिवन्मनः
समाधाय। विगलितसंसृतिबंधः प्राप्नोति परं
पदं नरो न चिरादिति॥६५॥ इति पंचदश्यां प्रथम
स्तत्त्वविवेकः समाप्तः॥१॥ सदद्वैतं श्रुतं यत्त
त्पंचभूतविवेकतः बोद्धुं शक्यं ततो भूतपंच
कं प्रविविच्यते॥१॥

ख्या समाप्ता ॥ नत्वा श्रीभारतीतीर्थ
विद्यारण्यमुनीश्वरौ। पंचभूतविवेकस्य व्याख्यानं क्रि
यते मया॥१॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीय
ब्रह्मेति श्रुत्या जगदुत्पत्तेः पुरा यज्जगत्कारणं सद्रूप
मद्वितीयं ब्रह्म लक्षितं। तत्स्वयं वाङ्मनसागोचरत्वेन स्वतो
ऽवगंतुमशक्यत्वात्तत्कार्यत्वेन तदुपाधिभूतस्य भूतपं
चकस्य विवेकद्वारा तदवबोधनाय योग्यत्वात्तेन भू
पं॰प्र तपंचकविवेकं प्रतिजानीते॥ सदद्वैतमिति॥१॥
१५ रामाय नमो नमः॥ ॥ ॥ ॥ ॥ ॥ ॥

ॐनमोगुरवे॥ॐ श्रीदेव्युवाच॥ ॐ ब्रह्मादिकामृताती
तेस्वशक्त्यानंदनिर्भरम् ॥ नमामिपरमेशानस्वच्छंदवीर
नायकम् कैलासशिखरासीनंदेवदेवंजगद्गुरुम् ॥
पप्रच्छप्रणतादेवीभैरवंविगतामयम् ॥ श्रीदेव्युवाच
प्रायश्चित्तेषुसर्वेषुसमयोल्लंघनेषुच ॥ महाभयेषुघोरेषु
तीव्रोपद्रवभूमिषु ॥ क्रिरस्थानेषुसर्वेषुतदुपायंवदस्व
मे ॥ येनाभ्यासेनरहितोनिर्दोषश्चभवेन्नरः ॥ श्रीभैर
वउवाच ॥ शृणुदेविपरंगुह्यंरहस्यंपरमाद्भुतम्
सर्वपापप्रशमनंसर्वदुःखविनाशनम् ॥ प्रायश्चि
त्तेषुसर्वेषुनेत्रेष्ठ्यपिविमोचनम् ॥ सर्वक्लिष्टापह
रणंसर्वार्तिविनिवारणम् ॥ समयोल्लंघनेघोनृपा
देवविमोचनम् ॥ भोगमोक्षप्रदंदेविसर्वसिद्धिफ
लप्रदम् ॥ शतजापेनशुद्ध्यन्तिमहापातकिनोपि ।
ये ॥ नरपंचानकंहन्तिनस्यादेनोपपातकम् ॥ कापि
केवाचिकंचैवमानसंस्पर्शदोषजम् ॥ प्रमादादि
क्षेपाद्वापिशतजापेनशुद्ध्यति ॥ पागारंभेठया ।
गेवपरिनिक्षेपपतनः ॥ निमैतेमिद्रिकेवापिप
रस्याप्यात्मनोपिवा ॥ तच्छिद्रकरणेश्रीक्रमभाव
परिहरणम् ॥ इष्टदेवमंत्रदेवज्ञानयोगविवर्जि
ते ॥ भक्तिश्रद्धाविहीनेशरीरस्येविशेषतः

मनोविलेपहेषेच विलोपेपश्यती हिते। विधिहेनेत्र
मादेवजप्रंचसर्वकर्मसु॥ नातः परतरोमंत्रो नातः
परतरस्तुतिः॥ नातः परतरा काचित्सम्पत्कामेगिरा
प्रिये॥ इयंसमयविद्यानां राजराजेश्वरेश्वरी॥ पर
माख्यायने देविभैरवस्तत्र कीर्त्तितम् श्री॥
णनेसर्वदेवीनां सर्वसौभाग्यवर्ध
नम्॥ स्तवराजमिमंपुण्यं।
शृणुष्वावहिता प्रिये।
इहभगवान्नरस्त्रनेत्र।
काशेषविश्वदर्पणनगरवदनारि।
क्षेमथ्वनिरिक्तमिवावविभासयिशुः।
स्वात्मानमेवस्तोत्रेणवक्त्रतृपगर्भेणत्रणामनि

ॐ परमाकाशे परमशिवात्मिकायां स्वभित्तौ शे।
ते विश्वात्मनि ॥ तदा विश्वं भवतीति सत्यमत
एव परमेशानेन न विद्वे ॥ अत एव तत्त्वाभिरा
नैर्यमदेन रूपः ॥ अत एव परमात्मा यः परश्चेष्टे
रूपः। तस्मै नमस्ते विसमाविशामीत्यर्थः ॥ अवा
च्यायेति ॥ अवाच्याय वैकल्पिकविज्ञानगोचराय

ॐ नमः परमाकाशशायिने परमात्मने ॥ शिवा
य परमेशाने विश्वनेत्रपरात्मने ॥ ॥ अवाच्याया
प्रमेयाय प्रमात्रे विहितेन ते ॥ महासामान्यरूपाय स
त्तामात्रैकरूपिणे ॥ १ ॥
श्र

घ्या
अप्रमेयाय निर्विकल्पिकविज्ञानापरिच्छेद्यायान
एव प्रमात्रैकरूपाय ॥ तथाने पि विश्वहे नते ॥ नन
